# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (१२)

१०.१०.२०११

# पुनरावर्तनम्

- नकारान्ताः पुंलिङ्गाः
- राजन्
- सर्वनामस्थाने उपधादीर्घः, शसादिषु अजादौ अल्लोपः, हलादौ नलोपः ।
- यज्वन्, ब्रह्मन्
- ’न संयोगाद्वमन्तात्’ इति अल्लोपनिषेधः ।
- वृत्रहन्
- ‘सौ च’ इति सौ उपधादीर्घः । अन्येषु सर्वनामस्थानेषु ’इन्-हन्-पूषार्यम्णां शौ’ इति निषेधाद् उपधादीर्घो न । शस्प्रभृतिषु अल्लोपे कृते ‘हो हन्तेर्ञ्णिन्नेषु’ इति कुत्वम् ।

- शार्ङ्गिन्, यशस्विन्, अर्यमन्, पूषन्
- ‘सौ च’ इति सौ उपधादीर्घः । अन्येषु सर्वनामस्थानेषु ’इन्-हन्-पूषार्यम्णां शौ’ इति निषेधाद् उपधादीर्घो न ।
- मघवन्
- ‘मघवा बहुलम्’ इति वा तृत्वम् । तृत्वपक्षे सर्वनामस्थाने ’उगिदचाम्…’ इति नुमागमः ।
- तृत्वाभावे शसादिषु अजादौ ’श्वयुवमघोनामतद्धिते’ इति सम्प्रसारणम् ।
- श्वन्, युवन्
- शसादिषु अजादौ ’श्वयुवमघोनामतद्धिते’ इति सम्प्रसारणम् ।

- अर्वन्
- 'अर्वणस्त्रसावनञः' इति सुभिन्नेषु प्रत्ययेषु तृत्वम् । तृत्वे कृते सर्वनामस्थाने 'उगिदचाम्...' इति नुमागमः ।
- पथिन्-मथि-ऋभुक्षिन्
- 'पथिमथ्यृभुक्षामात्' (सौ परे), 'इतोऽत्सर्वनामस्थाने', 'थो न्थः', 'भस्य टेर्लोपः' ।
- पञ्चन्
- 'षड्भ्यो लुक्' इति जश्शसोः लुक् । आमि 'षट्चतुर्भ्यश्च' इति नुट्, 'नोपधायाः' इति उपधादीर्घः, नलोपः ।

- नकारान्तः पुंलिङ्गः ‘अष्टन्’ शब्दः ।
- नित्यं बहुवचनान्तः ।

- अष्टन् (जस्) अस्

# ३७१. अष्टन आ विभक्तौ (७.२.८४)

- पदत्रयम् । अष्टनः, आ, विभक्तौ ।
- 'रायो हलि' (७.२.८५) इत्यतः 'हलि' इति अपकृष्यते ।
- अष्टनः आत्वं स्याद् हलादौ विभक्तौ ।

# ३७२. अष्टाभ्य औश् (७.१.२१)

- पदद्वयम् । अष्टाभ्यः, औश् ।
- 'जश्शसोः शिः' (७.१.२०) इत्यतः 'जश्शसोः' इति अनुवर्तते ।
- कृताकाराद् अष्टनः परयोः जश्शसोः औश् स्यात् ।
- 'अष्टभ्यः' इति वक्तव्ये कृतात्वनिर्देशः जश्शसोः विषये आत्वं ज्ञापयति ।

- वैकल्पिकं चेदम् अष्टनः आत्वम् ।
- 'अष्टनो दीर्घात्' (६.१.१७२) इति सूत्रे दीर्घग्रहणात् ज्ञापकात् ।
- दीर्घान्ताद् अष्टन्-शब्दात् परा असर्वनामस्थानविभक्तिः उदात्ता स्याद् इत्यर्थः ।
- यदि आत्वं नित्यं स्यात्, तर्हि ह्रस्वान्ताद् अष्टन्-शब्दात् परस्याः विभक्तेः असम्भवात् दीर्घग्रहणं व्यर्थं स्यात् ।

- अष्टन्  अस्
- अष्ट आ  अस् (‘अष्टन आ विभक्तौ’ - ७.२.८४ - इति आत्वम्)
- अष्टा   अस्    (‘अकः सवर्णे दीर्घः’ - ६.१.१०१)
- अष्टा   औ   (‘अष्टाभ्य औश्’ - ७.१.२१ - इति औशादेशः)
- अष्टौ                    (‘वृद्धिरेचि’ - ६.१.८८)

- अष्टौ ।
- परमाष्टौ ।
- प्राधान्ये आत्वम्, औशादेशश्च भवति ।

- अष्टाभिः
- अष्टाभ्यः

- अष्टन्   आम्
- अष्टन्  न् आम् ('षट्चतुर्भ्यश्च' - ७.१.५५ इति नुट्)
- अष्ट आ नाम्  ('अष्टन आ विभक्तौ' - ७.२.८४ - इति आत्वम्)
- अष्टानाम्    ('अकः सवर्णे दीर्घः' - ६.१.१०१)

- अष्टसु
- आत्वाभावे अष्ट अष्ट इत्यादि पञ्चवत् ।

# नकारान्तः पुंलिङ्गः अष्टन्-शब्दः

ज्ञापकात् 'अष्टन आ विभक्तौ' इति आत्वम् । जश्शसोः औश् । आत्वाभावपक्षे लुक् ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | | | अष्टौ/अष्ट |
| द्वितीयाविभक्तिः | | | अष्टौ/अष्ट |
| तृतीयाविभक्तिः | | | अष्टाभिः/अष्टभिः |
| चतुर्थीविभक्तिः | | | अष्टाभ्यः/अष्टभ्यः |
| पञ्चमीविभक्तिः | | | अष्टाभ्यः/अष्टभ्यः |
| षष्ठीविभक्तिः | | | अष्टानाम् |
| सप्तमीविभक्तिः | | | अष्टासु/अष्टसु |

हलादौ विभक्तौ वैकल्पिकम् आत्वम् ।

आमि नुट्, आत्वम् । आत्वाभावे उपधादीर्घः, नलोपः । समानं रूपम् ।

- गौणत्वे तु आत्वाभावे राजवत् ।
- प्रियाः अष्टौ यस्य सः - प्रियाष्टन् शब्दः ।
- प्रियाष्टा प्रियाष्टानौ प्रियाष्टानः ।
- प्रियाष्टानम् प्रियाष्टानौ
- शसि प्रियाष्ट्नः ।
- प्रियाष्ट्ना इत्यादि ।

- जश्शसोः अनुमीयमानम् आत्वं प्राधान्य एव, न तु गौणतायाम्, तेन प्रियाष्ट्नः हलादावेव वैकल्पिकम् आत्वम् ।
- प्रियाष्टाः ।
- प्रियाष्टाभ्याम् । प्रियाष्टाभिः ।
- प्रियाष्टाभ्यः ।
- प्रियाष्टासु ।
- ‘प्रियाष्ट्नो राजवत्सर्वं हाहावच्चापरं हलि’ ।

# नकारान्तः पुंलिङ्गः प्रियाष्टन्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | प्रियाष्टा/प्रियाष्टाः | पियाष्टानौ | प्रियाष्टानः |
| द्वितीयाविभक्तिः | प्रियाष्टानम् | प्रियाष्टानौ | प्रियाष्ट्नः |
| | प्रियाष्ट्ना | प्रियाष्टभ्याम्/प्रियाष्टाभ्याम् | प्रियाष्टभिः/प्रियाष्टाभिः |
| चतुर्थीविभक्तिः | प्रियाष्ट्ने | प्रियाष्टभ्याम्/प्रियाष्टाभ्याम् | प्रियाष्टभ्यः/प्रियाष्टाभ्यः |
| पञ्चमीविभक्तिः | प्रियाष्ट्नः | प्रियाष्टभ्याम्/प्रियाष्टाभ्याम् | प्रियाष्टभ्यः/प्रियाष्टाभ्यः |
| षष्ठीविभक्तिः | प्रियाष्ट्नः | प्रियाष्ट्नोः | प्रियाष्ट्नाम् |
| सप्तमीविभ | | | प्रियाष्टसु/प्रियाष्टासु |

आत्वाभावे राजवद्रूपाणि

हलादौ विभक्तौ वैकल्पिकम् आत्वम् ।